चूर्णान्येषां क्षिपेत्तत्र घनीभूतेऽवतारिते ॥
धान्यकं जीरकं पत्रं चित्रकं मुस्तकं त्वचम् ।
कृष्णजीरकमप्यत्र ग्रन्थिकं नागकेशरम् ॥
एलाबीजं लवङ्गञ्च पृथक् जातीफलं पलम् ।
सिद्धं शीते प्रदद्याच्च मधुनः कुडवद्वयम् ॥
भक्षयेद्भोजनादर्व्वाक् पलमात्रमिदं नरः ।
अथवा नियता नात्र मात्रा खादेद्यथानलम् ॥
मानवः सेवनादस्य वाजीव सुरते भवेत् ।
समर्थो बलवान् पुष्टो हृष्टो नित्यं निरामयः ॥
ग्रहणीं नाशयेदेष क्षयं श्वासमरोचकम् ।
अम्लपित्तञ्च पित्तञ्च रक्तपित्तञ्च पाण्डुताम् ॥”
कृष्णजीरकं नागागरेला । इति आम्रपाकः ॥
“शमयति गोक्षुरचूर्णं छागक्षीरेण साधितं समधु ।
शुक्रं क्षपयति जातं यच्चानितं कुप्रयोगेण ॥
द्रव्याणि चन्दनादिस्तु चन्दनं रक्तचन्दनम् ।
पतङ्गमथ कालीयागुरुकृष्णागुरूणि च ॥
देवद्रुमः ससरलः पद्मकं तुणिकोऽपि च ।
कर्पूरो मृगनाभिश्च लताकस्तूरिकापि च ॥
सिह्लकः कुङ्कुमं नखं जातीफलकमत्र च ।
जातीपत्रं लवङ्गञ्च सूक्ष्मैला महती च सा ॥
कङ्कोलफलकं त्वक् च पत्रकं नागकेशरम् ।
बालकञ्च तथोशीरं मांसी दारु सितापि वा ॥
मुरा कर्पूरकश्चापि शैलेयं भद्रमुस्तकम् ।
रेणुका च प्रियङ्गुश्च श्रीवासो गुग्गुलुस्तथा ॥
लाक्षा नखश्च रालश्च धातकीकुसुमं तथा ।
ग्रन्थिपर्णञ्च मञ्जिष्ठा तगरं सिक्थकं तथा ॥
एतानि शाणमानानि कल्कीकृत्य शनैः पचेत् ।
तैलं प्रस्थमितं सम्यक् एतत्पात्रे शुभे क्षिपेत् ॥
अनेनाभ्यक्तगात्रस्तु वृद्धोऽशीतिसमोऽपि यः ।
युवा भवति शुक्राढ्यः स्त्रीणामत्यन्तवल्लभः ॥
वन्ध्यापि लभते गर्भं षण्ढोऽपि तरुणायते ।
अपुत्रः पुत्रमाप्नोति जीवेच्च शरदां शतम् ॥
चन्दनादिमहातैलं रक्तपित्तं क्षयं ज्वरम् ।
दाहप्रस्वेददौर्गन्ध्यं कुष्ठं कण्डुं विनाशयेत् ॥”
पतङ्गं बकम् इति लोके । कालीयं कलम्बक इति लोके । लताकस्तूरिका मुस्कदाना इति लोके । कङ्कोलफलस्याभावे जातीपुष्पं ग्राह्यम् । तदभावेऽपि लवङ्गं ग्राह्यम् । दारुशिता दारुचिनी । शैलेयं छरा इति लोके । श्रीवासः गुगुरी इति लोके । ग्रन्थिपर्णः गठिवन् इति लोके । अशीतिसमः अशीतिवार्षिकः । इति चन्दनादितैलम् ॥ * ॥
“बीजानि कौशकच्छ्वाः कुडवमितानि स्वेदये-
च्छनकैः ।
प्रस्थे गोभवदुग्धे दुग्धं यावद्भवेद्गाढम् ॥
त्वग्रहितानि च कृत्वा सूक्ष्मं संपेषयेत्तानि ।
पिष्टिकया लघुवटिकाः कृत्वा गव्ये पचेदाज्ये ॥
द्विगुणितशर्करया वा वटिकाः संपक्वा
सेव्याः ।
वटिका माक्षिकमध्ये मज्जनयोग्येऽखिलाः
स्थाप्याः ।
पलटङ्कमितास्तास्तु सायं प्रातश्च भक्षयेत् ।
अनेन शीघ्रद्रावी यो यश्च स्यात् पतितध्वजः ॥
सोऽपि प्राप्नोति सुरते सामर्थ्यमिति वाजिवत् ।
नानेन सदृशं किञ्चित् द्रव्यं वाजीकरं परम् ॥”
इति वानरीवटिका ॥ * ॥
“आकारकरभा शुण्ठी लवणं कुङ्कुमं कणा ।
जातीफलं जातिपुष्पं चन्दनं कार्षिकं पृथक् ॥
चूर्णयेदहिफेनन्तु तत्र दद्यात् पलोन्मितम् ।
सर्व्वमेकीकृतं माषमात्रं क्षौद्रेण भक्षयेत् ॥”
शुक्रस्तम्भकरं पुंसामिदमानन्दकारकम् ।
नारीणां प्रीतिजनकं सेवेत निशि कामुकः ॥”
इति भावप्रकाशः ॥
( यथा च ।

“विदारीकन्दांशुमतीद्वयौ ।
काकोलिकाभीरुपुनर्नवे द्वे ।
शृङ्गाटकं मागधिका बला च
चूर्णं सिताढ्यं सितया प्रयोज्यम् ॥
जीर्णे पयः पायसमेव योज्यं
करोति पुंसां बलमेवमोजः ।
स्त्रीणां सहस्रं भजतेऽपि षण्ढो
मासद्वयेनापि च सेवमानः ॥”

इति हारीते चिकित्सास्थाने ४६ अध्यायः ॥
“वाजीकरणमन्विच्छेत् सततं विषयी पुमान् ।
तुष्टिः पुष्टिरपत्यञ्च गुणवत्तत्र संश्रितम् ॥
अपत्यसन्तानकरं यत् सद्यः संप्रहर्षणम् ।
वाजीवातिबलो येन यात्यप्रतिहतोऽङ्गनाः ॥
भवत्यतिप्रियः स्त्रीणां येन येनोपचीयते ।
तद्वाजीकरणं तद्धि देहस्योर्ज्जस्करं परम् ॥
धर्म्म्यं यशस्यमायुष्यं लोकद्वयरसायनम् ।
अनुमोदामहे ब्रह्मचर्य्यमेकान्तनिर्म्मलम् ॥
अल्पसत्त्वस्य तु क्लेशैर्बाध्यमानस्य रागिणः ।
शरीरक्षयरक्षार्थं वाजीकरणमुच्यते ॥
कल्पस्योदग्रवयसो वाजीकरणसेविनः ।
सर्व्वेष्वृतुष्वहरहर्व्यवायो न निवार्य्यते ॥
अथ स्निग्धविशुद्धानां निरूहान् सानुवासनान् ।
घृततैलरसक्षीरशर्कराक्षौद्रसंयुतान् ॥
योगविद्योजयेत् पूर्व्वं क्षीरमांसरसाशिनम् ।
ततो वाजीकरान् योगान् शुक्रापत्यविवर्द्धनान् ॥
अच्छायः पूतिकुसुमः फलेन रहितो द्रुमः ।
यथैकश्चैकशाखश्च निरपत्यस्तथा नरः ॥
स्खलद्गमनमव्यक्तवचनं धूलिधूसरम् ।
अपि लालाविलमुखं हृदयाह्लादकारकम् ॥
अपत्यं तुल्यता केन दर्शनस्पर्शनादिषु ।
किंपुनर्यद्यशोधर्म्ममानश्रीकुलवर्द्धनम् ॥
शुद्धकाये यथाशक्ति वृष्ययोगान् प्रयोजयेत् ।
शरेक्षुकुशकाशानां विदार्य्या वीरणस्य च ॥
मूलानि कण्टकार्य्याश्च जीवकर्षभकौ बलाम् ।
मेदे द्वे द्वे च काकोल्यौ शूर्पपर्ण्यौ शतावरीम् ॥
अश्वगन्धामतिबलामात्मगुप्तां पुनर्नवाम् ।
वीरां पयस्यां जीवन्तीमृद्धिं रास्नां त्रिकण्ट-
कम् ।
मधुकं शालिपर्णीञ्च भागांस्त्रिपलिकान् पृथक् ।
माषाणामाढकञ्चैतद्द्रोणे साधयेदपाम् ॥
रसेनाढकशेषेण पचेत्तेन घृताढकम् ।
दत्त्वा विदारीधात्रीक्षुरसानामाढकाढकम् ॥
घृताच्चतुर्गुणं क्षीरं पेष्याणीमानि चावपेत् ।
वीरां स्वगुप्तां काकोल्यौ यष्टीं फल्गुनि पिप्प-
लीम् ॥
द्राक्षां विदारीं खर्ज्जूरं मधुकानि शतावरीम् ।
तत्सिद्धपूतं चूर्णस्य पृथक् प्रस्थेन योजयेत् ॥
शर्करायास्तुगायाश्च पिप्पल्याः कुडवेन च ।
मरिचस्य प्रकुञ्चेन पृथगर्द्धपलोन्मितैः ॥
त्वगेलाकेसरैः श्लक्ष्णैः क्षौद्राद्द्विकुडवेन च ।
पलमात्रं ततः खादेत् प्रत्यहं रसदुग्धभुक् ॥
तेनारोहति वाजीव कुलिङ्ग इव हृष्यति ।
विदारीपिप्पलीशालिप्रियालेक्षुरकाण्डजः ॥
पृथक् स्वगुप्तामूलाच्च कुडवांशं तथा मधु ।
तुलार्द्धं शर्कराचूर्णात् प्रस्थार्द्धं नवसर्पिषः ॥
सोऽक्षमात्रमतः खादेद् यस्य रामाशतं गृहे ।
आत्मगुप्ताफलान् क्षीरे गोधूमान् साधितान्
हिमान् ॥
माषान् वा सघृतक्षौद्रान् खादन् गृष्टिपयो-
ऽनुपः ।
जागर्त्ति रात्रिं सकलामखिन्नः खेदयेत् स्त्रियः ॥
बस्ताण्डसिद्धे पयसि भावितानसकृत्तिलान् ।
यः खादेत् ससितान् गच्छेत् स स्त्रीशतमपूर्व्ववत् ॥
चूर्णं विदार्य्या बहुशः स्वरसेनैव भावितम् ।
क्षौद्रसर्पिर्युतं लीढ्वा प्रमदाशतमृच्छति ॥”
“कृष्णाधात्रीफलरजः स्वरसेन सुभावितम् ।
शर्करामधुसर्पिर्भिर्लीढ्वा योऽनुपयः पिबेत् ॥
स नरोऽशीतिवर्षोऽपि युवेव परिहृष्यति ।
कर्षं मधुकचूर्णस्य घृतक्षौद्रसमन्वितम् ॥
पयोऽनुपानं यो लिह्यान्नित्यवेगः स ना भवेत् ॥”
“उच्चटाचूर्णमप्येवं शतावर्य्याश्च योजयेत् ॥
चक्रभृष्टं दधिसरं ससितं षष्टिकौदनम् ।
पटे सुमार्ज्जितं भुक्त्वा वृद्धोऽपि तरुणायते ॥”

“चाचरेण सकलां रतिचर्य्यां
कामशास्त्रविहितामनवद्याम् ।
देशकालबलशक्त्यनुरोधाद्-
वैद्यतन्त्रसमयोऽप्यविरुद्धाम् ॥
अभ्यङ्गोद्वर्त्तनस्नानगन्ध-
स्रक्चित्रवस्त्राभरणप्रकाराः ।
गान्धर्व्वकाव्यादिकथाप्रवीणाः
समानभावा वशगा वयस्याः ।
दीर्घिका स्वभवनान्तनिविष्टा
पद्मरेणुमधुमत्तविहङ्गाः ।
नीलसानुगिरिकूटनितम्बे
काननानि पुरकण्ठगतानि ॥
दृष्टिसुखा विविधा तरुजातिः
श्रोत्रसुखः कलकोकिलनादः ।
अङ्गसुखर्त्तुवशेन विभूषा-
चित्तसुखः सकलः परिवारः ॥

ताम्बूलमच्छमदिरा कान्ता कान्ता निशा
शशाङ्काङ्का ।